# Shrimad VedAntadeshika Ashtottarashatanama Stotram

# શ્રીમદ્વેદાન્તદેશિકાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : Vedanta Deshika Ashtottarashatanama Stotram 1

File name : vedAntadeshikAShTottarashatanAmastotram1.itx

Category : deities_misc, gurudev, aShTottarashatanAma, vedAnta-deshika

Location : doc_deities_misc

Proofread by : Aruna Narayanan

Description/comments : See corresponding nAmAvalI

Latest update : November 1, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 5, 2024

*sanskritdocuments.org*

# શ્રીમદ્વેદાન્તદેશિકાષ્ટોત્તરશતનામસ્તોત્રમ્

શ્રીઃ ।
અથ શ્રીમદ્વેદાન્તદેશિકાષ્ટોત્તરશતનામસ્તોત્રમ્ ।
નિગમાન્તગુરોર્નામ્નાં પ્રભાવો યેન વર્ણિતઃ ।
તં વેઙ્કટાર્યમનિશં તાતાર્યતનયં ભજે ॥

વિદુષા વેઙ્કટાર્યેણ તાતાર્યતનુજન્મના ।
વેદાન્તાર્યગુરોર્નામ્નાં પ્રભાવો વર્ણ્યતેતરામ્ ॥

સુદર્શનકૃપાલબ્ધ વેદતત્ત્વાર્થસાગરમ્ ।
અનુષ્ઠિતઃ ક્રતુશતં વન્દેઽસ્મત્પિતરં ગુરુમ્ ॥ ૧॥

કુમારતાતયાચાર્ય સદાચારપરં સદા ।
વેદાન્તાચાર્યસિદ્ધાન્તવિજયધ્વજમાશ્રયે ॥ ૨॥

સાઙ્ખ્યસૌગતચાર્વાકશાઙ્કરાદિતમોનુદમ્ ।
ત્રય્યન્તદેશિકં વન્દે વેઙ્કટેશાહ્વયં મહઃ ॥ ૩॥

શ્રીમદ્વેઙ્કટનાથસ્ય નામ્નામષ્ટોત્તરં શતમ્ ।
સઙ્ગૃહ્ય તત્પ્રસાદાય વક્ષ્યે સર્વાર્થસિદ્ધિદમ્ ॥ ૪॥

અથ સ્તોત્રમ્ ।
ૐ ઘણ્ટાવતારોઽનન્તાર્યતનયો વેઙ્કટાધિપઃ ।
શ્રીમલ્લક્ષ્મણયોગ્યંશો વરદાચાર્યવીક્ષિતઃ ॥ ૫॥

રામાનુજાર્યસન્દૃષ્ટસ્સૌપર્ણમનુચિન્તકઃ ।
તાર્ક્ષ્યદત્તવરશ્શુદ્ધઃ પ્રસાદિતહયાનનઃ ॥ ૬॥

અધીતસાઙ્ગસકલશ્રુતિસ્મૃતિવિદગ્રણીઃ ।
ઇતિહાસપુરાણજ્ઞસ્સુકવિસ્તર્કતત્ત્વવિત્ ॥ ૭॥

ભાષ્યકારો ભયહરસ્સુધાશીદુગ્ધરાશિકૃત્ ।

પ્રધાનપ્રતિતન્ત્રજ્ઞો દેવતાપારમાર્થ્યવિત્ ॥ ૮॥

શ્રુતવિદ્યશ્શ્રાવયિતા શ્રુતપાલશ્શ્રુતપ્રદઃ ।
શ્રિતઃ પાણ્ડિત્યદાતા ચ કૃતકૃત્યઃ કૃતી સુધીઃ ॥ ૯॥

નિરસ્તસાઙ્ખ્યઃ પ્રત્યુક્તયોગઃ કાણાદભઞ્જનઃ
અચિચ્ચૈતન્યવાદઘ્નઃ ક્ષણિકાણુમતાર્દનઃ ॥ ૧૦॥

સાકારધી નિરાકર્તા શૂન્યવાદતમોનુદઃ ।
કુદૃષ્ટ્યુરગપક્ષીશઃ સપ્તભઙ્ગીવિલોપનઃ ॥ ૧૧॥

ભેદાભેદમતછેત્તા ધૂતયાદવકલ્પનઃ ।
અનીશવાદિદમ્ભોલિઃ પાષણ્ડમતખણ્ડનઃ ॥ ૧૨॥

સંરક્ષિતાગમશ્શઙ્ખચક્રધારણરક્ષિતા ।
ઊર્ધ્વપુણ્ડ્રાઙ્કનત્રાતા શુદ્ધસત્ત્વમયાકૃતિઃ ॥ ૧૩॥

યત્યાચારપ્રતિષ્ઠાતા સર્વતન્ત્રસ્વતન્ત્રધીઃ ।
અવતાર રહસ્યજ્ઞસ્ત્વર્ચાસૌન્દર્યસક્તધીઃ ॥ ૧૪॥

અર્થપઞ્ચક તત્ત્વજ્ઞઃ તત્ત્વત્રયવિશેષવિત્ ।
ભક્તિયોગ વિરોધિઘ્નો ભક્તિમાન્ ભગવત્પ્રિયઃ ॥ ૧૫॥

જ્ઞાનૈકસારો દ્વયવિદ્વિભક્તાધિકૃતિત્રયઃ ।
ચતુશ્શ્લોક્યર્થ સારજ્ઞઃ સમ્યગ્જ્ઞાતાઙ્ગપઞ્ચકઃ ॥ ૧૬॥

ષડઙ્ગયોગ નિર્ણેતા સપ્તતન્તુકૃદુત્તમઃ ।
અષ્ટાક્ષરૈકનિરતો નવમૈકરસાશ્રયઃ ॥ ૧૭॥

દશતાત્પર્યવિજ્ઞાતા શતકૃચ્ચ સહસ્રવિત્
સ્થૂલલક્ષોઽનેકનાનાકોટિજ્ઞાનનિવર્તકઃ ॥ ૧૮॥

ધર્મશઙ્કુસ્સાધુબૃન્દવન્દિતાઙ્ઘ્રિસરોરુહઃ ।
પદ્માક્ષાનન્દજનકસ્તથાઽનન્તગુણાકરઃ ॥ ૧૯॥

ત્યાગશબ્દાર્થવિદ્ધર્મવેદી વિધિવિશેષવિત્ ।
ઉત્તમશ્લોકભાવજ્ઞઃ પઞ્ચકાલપરાયણઃ ॥ ૨૦॥

સુરસેવ્યઃ પૂર્ણમનાસ્સૂરીન્દ્રપ્રતિરૂપકઃ ।
કવિતાર્કિકપઞ્ચાસ્યો નિગમાઞ્ચલદેશિકઃ ॥ ૨૧॥

વૈદ્યો મુનીન્દ્રસ્સર્વજ્ઞઃ ઉપકર્તા તથૈવ ચ ।
સત્સમ્પ્રદાયસ્થિરધીરનઘસ્સત્યવાગપિ ॥ ૨૨॥

સાધુવૃત્તિર્મુક્તડમ્ભો જિતાક્ષો દીર્ઘબન્ધુમાન્ ।
દયાલુશ્શાસિતા સર્વહિતાચરણતત્પરઃ ॥ ૨૩॥

મહાગુરુસ્સ્વર્ણવર્ણસ્સુબાહુઃ પુણ્ડરીકદૃક્ ।
પવિત્રપાણિર્વ્યાખ્યાનમુદ્રાઙ્કિતકરામ્બુજઃ ॥ ૨૪॥

સવ્યપાણિતલન્યસ્તદિવ્યપુસ્તકભૂષણઃ ।
પરશીર્ષન્યસ્તવામપાદાબ્જકટકોજ્જ્વલઃ ॥ ૨૫॥

ફલશ્રુતિઃ -
ઇતીદં દેશિકેન્દ્રસ્ય નામ્નામષ્ટોત્તરં શતમ્ ।
સઙ્કીર્તયેદનુદિનં સર્વપાપાપનુત્તયે ॥ ૨૬॥

પઠન્નામશતં ભક્ત્યા શ્રુત્વા ગુરુમુખામ્બુજાત્ ।
પ્રસાદાદ્દેશિકેન્દ્રસ્ય ભુક્તિમુક્તિ સમશ્નુતે ॥ ૨૭॥

એકૈકમપિ તન્નામ કીર્તયન્ સકૃદુત્તમમ્ ।
સર્વાન્કામાનવાપ્નોતિ કિમુતાષ્ટોત્તરં શતમ્ ॥ ૨૮॥

ઇતિ શ્રીમદ્વેદાન્તદેશિકાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

*Shrimad VedAntadeshika Ashtottarashatanama Stotram*

pdf was typeset on November 5, 2024

Please send corrections to *sanskrit@cheerful.com*